श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीश्रीनिवासनिगमान्त यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ श्रीश्रीनिवास मङ्गळाशासनम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीश्रीनिवास मङ्गळाशासनम् ॥

सर्व मङ्गळसंभूतिस्थान वेङ्कट भूधरे।
नित्यक्लृप्त निवासाय श्रीनिवासाय मङ्गळम्॥ १ ॥

आश्रितार्थितकल्पाय कौस्तुभालङ्कृतोरसे।
ज्ञानशक्त्यादिपूर्णाय श्रीनिवासाय मङ्गळम्॥ २ ॥

नित्य निर्धूतहेयाय दिव्यमङ्गळमूर्तये।
अञ्जनाचलभूषायै श्रीनिवासाय मङ्गळम्॥ ३ ॥

वेद वेदान्तवेद्याय कारणाय महात्मने।
प्राप्याय प्रापकाय स्यात् श्रीनिवासाय मङ्गळम्॥ ४ ॥

सर्वलोक शरण्याय चिदचिद्वस्तु शेषिणे।
श्रीवत्साङ्कितवक्षाय श्रीनिवासाय मङ्गळम्॥ ५ ॥

स्वीय घण्टांश वेदान्तदेशिकानन्दहेतवे।
सेतवे सर्वलोकानां श्रीनिवासाय मङ्गळम्॥ ६ ॥

वाणी वल्लभमुख्यार्चा तोषिताय महात्मने।
विविधाश्चर्य वर्याय श्रीनिवासाय मङ्गळम्॥ ७ ॥

दिव्यसूरि समाक्रान्त निजवासादि कोटये।
निकृष्टोत्कृष्ट तुल्याय श्रीनिवासाय मङ्गळम्॥ ८ ॥

॥ इति श्रीश्रीनिवास मङ्गळाशासनं संपूर्णम् ॥